तर्णिता-त्री, तर्णयिता-त्री, तितर्णिषिता-त्री, तरीतृणिता-त्री ;
[1]तर्णुवन्-तृण्वन्-ती, [2]तर्णयन्-न्ती, तितर्णिषन्-न्ती ; —
तर्णिष्यन्-न्ती-ती, तर्णयिष्यन्-न्ती-ती, तितर्णिषिष्यन्-न्ती-ती ; —
तर्णुवानः, — तितर्णिषमाणः, तरीतृण्यमानः ;
तर्णिष्यमाणः, तितर्णिषिष्यमाणः, तरीतृणिष्यमाणः ; —
[3]तृण्-तृणौ-तृणः, [4]तृत्-तृतौ-तृतः ; — —
[5]तृतम्-तः-तवान्, तर्णितः, तितर्णिषितः, तरीतृणितः-तवान् ;
तृणः, [6]तर्णकः, [A]तर्णः, तितृर्णिषुः, तरीतृणः ;
तर्णितव्यम्, तर्णयितव्यम्, तितर्णिषितव्यम्, तरीतृणितव्यम् ;
तर्णनीयम्, तर्णनीयम्, तितर्णिषणीयम्, तरीतृणनीयम् ;
[7]तृण्यम्, तर्ण्यम्, तितर्णिष्यम्, तरीतृण्यम् ;
ईषत्तर्णः-दुस्तर्णः-सुतर्णः ; — — —
तृण्यमानः, तर्ण्यमानः, तितर्णिष्यमाणः, तरीतृण्यमानः ;
[8]तृणम्, [9]कत्तृणम्, तर्णः, तितर्णिषः, तरीतृणः ;

---

1. '**तनादि**कृञ्भ्य उः' (3-1-79) इति उः विकरणप्रत्ययः। गुणः। 'अचि श्नुधातु—' (6-4-77) इत्युवङ्। स्त्रियां उगित्त्वेन ङीप्। **आत्रेयादयस्तु** 'संज्ञापूर्वको विधिरनित्यः' (परिभाषा 94) इत्याश्रित्य गुणाभावं मत्वा, **तृण्वन्-ती** इति रूपमाहुः।
2. ण्यन्तात्, '**निगरण**चलनार्थेभ्यश्च' (1-3-87) इति परस्मैपदमेव। तेन शानच् न भवति।
3. क्विपि रूपमेवम्। तेन अनुनासिकलोपो न भवति।
4. क्विपि तु, 'गमः क्वौ' (6-4-40) इत्यत्र '**गमादीना**मिति वक्तव्यम्' (वा. 6-4-40) इति वार्तिकात्, अनुनासिकलोपे, तुकि रूपमेवं भवति। **गमादयः**=गमप्रकाराः इति सर्वैः व्याख्यातत्वात् न दोषः।
5. 'अनुदात्तोपदेशवनति**तनोत्यादीना**मनुनासिकलोपो झलि क्ङिति' (6-4-37) इत्यनुनासिकलोपे रूपम्।
6. 'आशिषि च' (3-1-150) इति वुन्।
7. '**ऋदुपधा**च्चाक्लृपिचृतेः' (3-1-110) इति क्यप्।
8. 'घञर्थे कविधानम्' (वा. 3-3-58) इति कप्रत्ययः। कित्त्वान्न गुणः।
9. '**तृणे** च जातौ' (6-3-103) इति तत्पुरुषे कद्भावः।

A. 'गावः पिबन्तु गणशः कलशाम्बुराशिं किं तेन **तर्णक**गणाश्चिरमादधानाः॥'

देवनायकपञ्चाशत्—5.